# श्री गणेश स्तोत्रं
## (संसारेषु परस्पर प्रेम प्राप्ती सिध्यर्थं)

सुवर्णवर्ण सुन्दरं सितैक दन्त बन्धुरं गृहीत पाशकाङ्कुशं वरप्रदाभय प्रदम् |
चतुर्भुजं त्रिलोचनं भुजङ्गमोपवीतिनं प्रफुल्लवारिजासनं भजामि सिन्धुराननम् || १ ||

किरीटहारकुण्डलं प्रदीप्तबाहुभूषणं प्रचण्डरत्न कङ्कणं प्रशोभिताङ्घियष्टिकम् |
प्रभात सूर्यसुन्दराम्बर द्वय प्रधारिणं सरत्नहेम नूपुर प्रशोभिताङ्घ्रि पङ्कजम् || २ ||

सुवर्णदण्ड मण्डित प्रचण्ड चारु चामरं गृहप्रदेन्दु सुन्दरं युगक्षण प्रमोदितम् |
कवीन्द्र चित्त रञ्जकं महाविपत्ति भञ्जकं षडक्षर स्वरूपिणं भजे गजेन्द्ररूपिणम् || ३ ||

विरिञ्च विष्णुवन्दितं विरूपलोचन स्तुतं गिरीशदर्शनेच्छया समर्पितं पराम्बया |
निरन्तरं सुरासुरैः सपुत्रवामलोचनैः महामखेष्ट कर्मसु स्मृतं भजामि तुन्दिलम् || ४ ||

मदौघलुब्ध चञ्चलालिमञ्जुगुञ्जितारवं प्रबुद्धचित्त रञ्जकं प्रमोद कर्ण चालकम् |
अनन्य भक्ति मानवं प्रचण्ड मुक्तिदायं नमामि नित्यमादरेण वक्रतुण्ड नायकम् || ५ ||

दारिद्रय विद्रावणमाशु कामदं स्तोत्रं पठेदेतदजस्त्रमादरात् |
पुत्री कलत्र स्वजनेषु मैत्री पुमान् भवेदेकवरप्रसादात् || ६ ||

|| इति श्री गणेश स्तोत्रं सम्पूर्णं ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133